दनपेतो वा यत् अर्थ्यः। अर्थादनपेते अर्थसाधने च त्रि०। "अर्थ्यामर्थपतिर्वाचम्" रघुः। "वागीशं वाग्भिरर्थ्याभिः" कुमा०।

**अर्थकर** त्रि० अर्थं करोति कृ—हेत्वादौ ट। अर्थहेतु कर्मकारके स्त्रियां ङीप्। अर्थकरी दण्डनीत्यादिविद्या।

**अर्थकृच्छ्र** न० अर्थविषये कृच्छ्रम्। अर्थस्य प्रयोजनस्य कृच्छ्रतायाम् कष्टसाध्यत्व एव तस्य तथात्वम्।

**अर्थकृत्** त्रि० अर्थं करोति—कृ—क्विप्। अर्थकारके।

**अर्थक्रम** पु० ६त०क्रमनिर्णयाय श्रुतशब्दक्रमातिक्रमेणाश्रयणीये प्रयोजनानुसारिक्रमे यथा पाठक्रममनादृत्याग्निहोत्रसाधनतया यवागूपाकः प्राक्क्रियते अग्निहोत्ररूपप्रयोजनादेः यवागूसाध्यत्वात्तथात्वम् यथोक्तं मीमां० यत्र प्रयोजनवशेन क्रमनिर्णयः स अर्थक्रमः। यथा अग्निहोत्रं जुहोति यवागूं पचतीत्यग्निहोत्रहोमयवागूपाकयोः। यवाग्वा वह्होमसाधनत्वेन तत्पाकः प्रयोजनवशेन पूर्व्वमनुष्ठीयते। स चायं पाठक्रमाद्बलवान्। यथापाठं ह्यनुष्ठाने क्रमस्य प्रयोजनबाधेऽदृष्टार्थत्वं स्यात्। नहि होमानन्तरं क्रियमाणस्य पाकस्य किञ्चिद् दृष्टं प्रयोजनमस्ति येनार्थक्रमबाधेन पाठक्रमस्तत्रादिद्रियेत"।

**अर्थगत** त्रि० अर्थं गतः। १अर्थनिष्ठे अर्थाश्रये अलङ्कारोक्ते २दोषभेदे पु० अर्थदोषशब्दे विवरणम्। गतोऽर्थोऽस्य आहिता० वा परनि०। ३गतार्थे त्रि०।

**अर्थगौरव** न० ६त० स्वल्पशब्दस्यापि अर्थस्य गौरवम्। "भारवेरर्थगौरवम्" उद्भटः।

**अर्थघ्न** त्रि० अर्थं हन्ति ताच्छील्यादौ ट स्त्रियां ङीप्। अर्थनाशके "व्याधिता वाऽधिवेत्तव्या हिंस्रार्थघ्नी च सर्व्वदा" मनुः।

**अर्थचिन्ता** स्त्री अर्थानां तन्त्रावापादीनां चिन्ता। राज्याङ्गतन्त्रावापादीनां चिन्तने। "मन्त्री स्यादर्थचिन्तायामर्थास्तन्त्रावपादयः" सा०द०। अर्थचिन्तनमप्यत्र न० "मन्त्री स्वञ्चोभयञ्चापि सखा तस्यार्थचिन्तने" इति। सा०द०अन्यमतम्। [अर्थोजातोऽस्य। २जातधने त्रि०।

**अर्थजात** न० अर्थानां जातम् ६त०। १अर्थसमूहे।

**अर्थज्ञ** त्रि० अर्थं जानाति ज्ञा—क। प्रयोजनाभिज्ञे।

**अर्थतस्** अव्य०अर्थ+तसिल्। १अर्थादित्यर्थे २अर्थानुसारेणेत्यर्थे ३वस्तुस्वभावादित्यर्थे च। "अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः" वे० सा०।

**अर्थद** त्रि० अर्थान् धनानि ददाति दा-क। १धदे धनदानेन तोषकेऽध्याप्ये २शिष्यभेदे पु०। "आचार्य्यपुत्रः शुश्रूषुर्ज्ञानदोधार्म्मिकः शुचिः। आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्म्मतः" इति मनुः। ३कुवेरे पु०।

**अर्थदूषण** न० अर्थानां दूषणं नाशनम्। क्रोधजव्यसनमध्ये अतिशयेनासत्कर्म्मणि विनियोगेन कष्टदायके धननाशनरूपे व्यसनभेदे। "पैशुन्यं साहसं द्रोहईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः इति "दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे। क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदेति च" मनुः। "अर्थदूषणञ्च धनानामपहारः देयानामदानञ्चेति" म०त०रघुनन्दनः। [साधुः" कु०

**अर्थना** स्त्री अर्थ—युच्। याचने। "अभ्यर्थना भङ्गभयेन

**अर्थपति** पु० अर्थानां पतिः ६त०। १नृपे,। "अर्थ्यामर्थपतिर्व्वाचम्" सनैषधस्यार्थपतेः सुतायाम्" "किञ्चिद्विहस्यार्थपतिर्बभाषे"। "बलनिसूदनमर्थपतिञ्च तम्" इति च रघुः। २कुवेरे च।

**अर्थप्रकृति** स्त्री अर्थानां प्रयोजनानां प्रकृतिः कारणम्। १प्रयोजनहेतौ। "वीजं विन्दुः पताका च प्रकरी कार्य्यमेव च। अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि" सा०द० उक्ते नाटकाङ्गे २कार्य्यवीजरूपपञ्चके च।

**अर्थप्रयोग** पु० अर्थानां धनानां प्रयोगः नियोगः। ऋणदानादिवृत्तौ १ऋणदानवाणिज्यादिरूपे धनवृद्ध्यर्थके व्यवहारे। अर्थास्तन्द्रावापादयः ६त०। २यथायथं तन्द्रावापादेर्विनियोगे च। "अर्थप्रयोगकुशल" इति अमात्यलक्षणम्।

**अर्थप्राप्त** पु० अर्थतः वाचकशब्दाप्रयोगेऽपि तात्पर्य्यवशतः प्राप्तः। वाचकशब्दानुच्चारणेऽपि तात्पर्य्यवशात् ज्ञाते "अर्थप्राप्त एवात्मज्ञानविधेरेव यज्ञोपवीतादिपरित्यागो न विधातव्यः" वृ०उ०भा०।

**अर्थबन्ध** पु० अर्थैः विषयैः शब्दादिभिर्बन्धः। १जीवस्य शब्दादिभिः श्रोत्रसम्बन्धरूपे बन्धे २धनकृतबन्धे च।

**अर्थभावना** स्त्री अर्थनिष्ठा भावना भावयितुर्व्यापार उत्पादना। भट्टमतोक्तायामर्थनिष्ठायां यागसाधनिकायां स्वर्गाद्युत्पादनायां स्वर्गादीष्टं यागेन साधयेदित्येवंरूपायाम्। भावना च द्विधा शाब्दी आर्थी च विवरणं भावनाशब्दे।

**अर्थमर्य्यादा** स्त्री अर्थस्य कारणस्य मर्य्यादा इतरसहकारेण सामग्रीसमवधानम्। सामग्रीसमवधाने, सामग्रीसमवधाने हि